Yearly Subs : Rs.40/-, Each Copy : Rs.4/-

Date of Publication–1st February, 2019

सत्यानन्दम्

संस्कृत–मासिक–पत्रिका



श्रीश्रीठाकुर-सत्यानन्ददेवः

आविर्भावः १९०२	लीलाप्रकाशः १९३९	तिरोभावः १९६९
लालबाजार थाना, कोलकाता	सिउड़ी, बीरभूम	बरानगर, कोलकाता

श्रीसत्यानन्द-महापीठम्

१, आइ. पि. रोड, यादवपुरम्, कोलकाता–७०० ०३२

दूरभाषः २४१४–२२२१, M : ९३३१०१७२६२ / ९८७४४५९३१३

E-mail : satyanandampatrika@gmail.com

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

सत्यानन्दम्

संस्कृत-मासिक-पत्रिका

गिरिगैरिकमण्डितं ज्योतिर्मयं
नित्यमानन्दमूर्त्तिम् ।
करुणावतारं प्रेमपुरुषं सत्यानन्दरूपं
नियतं नमामः।
—स्वामी निर्वेदानन्दः

SATYANANDAM

Sanskrit Monthly Magazine

संस्कृतात् सत्यमानन्दं
विन्दमानाः शिवास्पदम् ।
श्रीगुरुं संस्कृतात्मानं
सत्यानन्दं भजामहे ॥
—डः श्री. भा. वर्णेकरः

उपदेष्ट्रमण्डलीः—

सत्यानन्द-मानसकन्या श्रीअर्चनापुरी माता। आचार्यः डः चन्द्रगुप्त-वर्णेकरः (नागपुरम्) आचार्यः विजय-गणेश-कुलकर्णी (कुरुक्षेत्रम्)। आचार्यः श्रीअशोक-समाजपतिः।

सम्पादकौ—स्वामी मृगानन्दः डः कुमारनाथ-भट्टाचार्य्यः च।

सहसम्पादकः—डः श्रीविप्लव-चक्रवर्ती।

संघटकाः प्रचारकाश्च—डः भास्करनाथ-भट्टाचार्य्यः देवरूपा-चक्रवर्तिनी श्रीसन्तोष-रायश्च

उद्देश्यानि—१। साधारणजनानां मध्ये सरलसंस्कृतस्य प्रसारमाध्यमेन संस्कृतं प्रति सुप्तानुरागस्य पुनर्जागरणम्। २। सरलसंस्कृतभाषया हिन्दुधर्मस्य संस्कृतेश्च प्रचारमाध्यमेन उच्चतरमूल्यबोधस्य जागृतिः तथा दिव्य-जीवनचर्यायाः दिङ्निर्देशः। ३। व्यावहारिक-भाषारूपेण संस्कृतस्य प्रयोगमाध्यमेन गृहे गृहे शान्तेस्तथा आनन्दस्य वाणीवितरणम्।

एषा पत्रिका कांक्षति यत् भक्तानां सर्वेषां संस्कृतानुरागः क्रमवर्धितः भवतु। कोऽपि महाभागः पत्रिका-प्रकाशनार्थं प्रणामीस्वरूपेण किमपि धनं ददाति चेत् वयं तत्दानं सादरं स्वीकरिष्यामः।

Kind donation may be sent by Draft / Cheque in favour of "SREE SATYANANDA DEVAYATAN". Exempt u/s 80G of I/ Tax

Sree Satyananda Devayatan, 1, I. P. Road, Jadavpur, Kolkata-700 032, Ph: 2414-2221
Life Membership—Rs. 800/- only. Membership may be enrolled from any month.
Please renew your annual membership regularly.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्पादकीयम्

'सत्यानन्दम्' पत्रिकायाः शुभे त्रयस्त्रिंशे वर्षे अधिरोहणम् अधिकृत्य सत्यानन्दसम्पूजनम्

सत्यानन्दपत्रिकायाः शुभे त्रयस्त्रिंशे वर्षे पदार्पणस्य पुण्ये लग्ने परमपूजनीयस्य सत्यानन्ददेवस्य स्मरणमङ्गलं मननचिन्तनम् अतिशयितस्य आनन्दामृतस्य सान्निध्यं समधिगमयति।

भगवतः सत्यानन्ददेवस्य सुगभीरस्य साधनजीवनस्य प्रथमे भागे सिउडि-आश्रमे तत्रभवता एकदा अपराह्णे अपावृतं कृतं द्वारं ध्यानगृहस्य। सर्वं दिनं यावत् अपावृते आत्मनः आधारे अन्तर्लोकात् अनारतम् आनन्दामृतं निष्यन्दितम् अभवत्। तेन निष्यन्दनेन नितरां नन्दितस्य पूर्णस्य हृदयस्य पात्रात् पूरोत्पीड-आनन्दस्य अनन्तस्य प्रवाहः प्राकृतजगति प्रसृतोऽभवत्। अतएव ध्यानगृहेण सार्द्धं हृदयस्यापि द्वारम् अपावृतम्, आनन्दस्य स्रोतसा तेन अन्तिकम् आगतानां भक्तानां तप्तहृदयानाम् अन्तःकरणस्य अभिषेकाय।

समीपस्था बालिका अर्चना साग्रहं भगवद्दर्शनाय अपेक्षमाणा आसीत्। को नाम ते जगति सापेक्षया प्रियतम इति ठाकुरस्य प्रेमप्रसन्नस्य प्रश्नस्य उत्तरे बालिका अर्चना अवदत् भवान् एव मे सर्वापेक्षया प्रियतमः। तदुत्तरे ठाकुरः अवदत् अपि देहम् इमं मां मानयसि? यदि तदेव भवेत् तदा त्वदीयं देहम् इमं विमुच्य कथं न शक्नोषि गृहं गन्तुम्। उत्तरं तु तत्त्वगर्भितस्य प्रश्नस्य अस्य स्वयम् एव प्रेममयः, कृपामयः तपोमयः तत्रभवान् वितीर्णवान्।

तत्रभवान् अवदत्—अपि जानासि देहम् इमम् आश्रित्य अधिवसति यः परमपुरुषः तमेव यूयम् आदरणीयं वरणीयं रमणीयम् अन्तरङ्गतमं प्रियतमं गणयथ। आसेचनकस्य परमानन्द-सीमान्तस्य तस्य सततं समवलोकनमपि चिरपिपासितस्य नयनयुगलस्य दर्शनपिपासा प्रशमिता न भवति।

देहे तस्मिन् परमात्मनः प्रियतमः प्रकाशो ध्याननयने सुचिरेण मन्थनेन समुत्थित इति कारणेन चित्तचमत्कारिणी चिरन्तनता तस्मिन् सुचारु चर्चिता भवति। अन्येषां जागतिकानां रमणीयानां वस्तूनां रामणीयकं द्वित्रिवारं विलोकनेनैव विलीयमानं भवति। तत्रभवतस्तु इयम् अलौकिकी रमणीयता सर्वं जीवनं व्याप्य निरन्तरं निरीक्षणेनापि नापैति। चिरपिपासितस्य नयनयुगलस्य तस्य दर्शनपिपासा अविनिवृत्ता एव समनुवर्तते। क्षणे क्षणे तत् नवतया नवनवान् अवतारान् आविष्कुर्वत् आविष्टान् करोति अनन्तान् आत्मजनान्। क्षणे क्षणे यन्नवताम् उपैति तदेव रूपं रमणीयताया इति कथाया अवितथत्वं तु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दृष्टान्तरूपेण निरूप्यते तस्मिन्नेव अनन्ये वदान्ये विदुषि।

श्रीमद्भगवद्गीतया: "नवद्वारे पुरे देही" (गीता ५/१३) इत्यादिश्लोकस्य व्याख्यायां श्रीमधुसूदनसरस्वतीपादेन यदुक्तं तस्यैव निर्यास: अनुसन्धातुं शक्यते देहात्मबोधस्य विनाशने सत्यानन्दवचने। सरस्वतीपादेन तत्र उक्तम्, "देही देहभिन्नात्मदर्शी प्रवासी इव परगृहे तत् पूजापरिभवादिभि: अप्रहृष्यन् अविषीदन् अहङ्कार-ममकारशून्य: तिष्ठति। अज्ञस्तु देहतादात्म्याभिमानात् हेह एव न तु देही। स च देहाधिकरणम् एव आत्मन: अधिकरणं मन्यमान: गृहे भूमौ आसने वा अहम् आसे इत्यभिमन्यते, न तु देहे अहम् आसे इति प्रतिपद्यते।"

देहभिन्नम् आत्मानं यो ध्यानेन अवलोकयति, तस्य देहे अहं ममाभिमानो विगलितो भवति। देहे स्वस्य स्वल्पां स्थितिं स न बहु मन्यते। प्रवासी यथा पराधीनतया परगृहे वसति तथैव अस्वस्तिकरीम् अस्वाभाविकीं च विवेचयति देहबद्धाम् आत्मन: अनित्यां स्थितिम्। यवन-हरिदासो यथा वेत्राघातेन विपद्यमान: अपि आघातजनितात् क्षतात् क्षरितेन रक्तस्नानेनापि क्षुब्ध: समाहितमना हरिनामनि एव मग्नमानसो नितरां रमते स्म, अथ वा जडभरत इव आत्मीयै: अन्यै: अनुदिनम् अवज्ञातोऽपि धिक्कृतोऽपि निगृहीतोऽपि नीरव: सर्वं तम् अध:कारम् आनन्दस्पन्दने एव परिणामयति आत्मदर्शी साधकवर:। तथैव सत्यानन्ददेव: अनित्ये दु:खदग्धे देहे परमसुखमयस्य परमात्मन: अधिष्ठानम् अवलोक्य आनन्दमग्नो भवति।

देहस्तावत् अयम् अतीव स्वल्पस्थायी। किन्तु देहेन अनेन आत्मोपलब्धे: सुमहान्तम् अधिकारम् अर्पयन् एव भगवान् देहमिमं सृजति स्म। अतएव तं सर्वश्रेष्ठम् अधिकारं सफलयितुं ध्यानस्य अतिमहान्तं प्रयोजनं परिकीर्तयति स्म तत्रभवान् भगवान् भुवनमङ्गलतनु: श्रीसत्यानन्ददेव:। पद्मपुराणे ध्यानस्य दुष्कृति-दूरीकरणक्षम: अद्भुत: प्रभावो वर्णित:।

यथा ज्वालाप्रसङ्गेन दीपस्तैलं प्रशोषयेत्।
तथा ध्यानप्रसङ्गेन कर्मणोऽपि क्षयो भवेत् ।

गभीरेण ध्यानेन दुष्कर्मणां तथैव दाहो भवति यथा प्रदीपस्थिता दीपशिखा वर्तियोगेन तैलं शोषयति।

साधनजीवनस्य एकस्मिन् समये सत्यानन्ददेवो गभीरेण अनुभवेन भावयति स्म ठाकुरं रामकृष्णदेवं मातरं सारदादेवीं वा पार्श्वेकृत्य पादचारणम् । नि:श्रेणिकया (सिंडि) अवतरणसमये भावयति भगवतो रामकृष्णदेवस्य सुगुप्तं पार्श्ववर्तित्वम्। एकैकस्मिन् दिने पुरत: स्थितं तं जीवनपथस्य प्रभोद्भासितं प्रदर्शयितारम् अपि पश्यति स्म स:। अनुभवोऽयं तथा वास्तवीभूतोऽभवत् यत् स्वल्पं द्रुततरेण गमनेनैव देवदेहेन तेन संघर्षो जनिष्यते इति बलवती शङ्का तम् आतङ्कितम् अकरोत्।

इत्थं चिन्तनेन स्मरणेन च कियती सुमहती कृपा अनारतम् अवाप्ता। मातरं पार्श्वेकृत्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वपिति। माता तस्य पार्श्वचरी निद्राति। भोजन-समये माता तस्य मुखे ग्रासं ग्राहयति। सः अपि जनन्यै ग्रासं ग्राहयति एवमेव स्वेष्टदेवेन स्वस्य स्वात्मीकरणं तत्रभवता ध्यानबलेन सम्पादितम्।

स्पर्शस्य पवित्रता विषये अपि ठाकुरस्य आसीत् सुमहती सावधानता। ब्रह्मचर्यावस्थायाम् स्पर्शविषये भवति सावधानता साधनाया अपरिहार्यम् अङ्गम्। सिद्धावस्थायां कोऽपि स्पर्शो मानसं विचलितं कर्तुं न प्रभवति। आत्मलग्ना चेतना तदा बाह्येषु स्पर्शेषु विषये सर्वथा उदासीना भवति। किन्तु ब्रह्मचर्यावस्थायाम् अपरिणतस्य मनसः स्पर्शविषयिणी सामान्यतमा अनुभूतिः अपि साधकस्य चिराय पतनस्य कारणं भवितुम् अर्हति। आहार-व्यवहारादिषु अनन्तेषु स्पन्दनेषु स्पर्शदोषस्य दूरीकरणेन अपरिमिता आध्यात्मिकी शक्तिः अन्तरे सञ्चिता भवति।

पाश्चात्त्यभावेन दूषितेषु महाविद्यालयेषु विश्वविद्यालयेषु च ब्रह्मचर्यस्य पालनम् उपहासास्पदम् एव परिचिन्त्यते। एतादृशे विरुद्धे परिवेशे अपि तत्रभवता विद्याग्रहणकाले सर्वविधात् अशुभात् अशुद्धात् च स्पर्शात् पवित्रा स्वकीया सत्ता सावधानं संरक्षिता आसीत्। श्रेणीकक्षे एकस्मिन् कोणे उपवेशनस्य स्थानमङ्गीक्रियते स्म। तेन एकस्मिन् एव पार्श्वे न तु पार्श्वद्वये जनान्तरेण सम्पर्कः समभवत्। एतद् व्यतीतम् मनसा देहं परितो मानसं जपमयं वृत्तं विनिर्मितम्। तेन एवं मन्यते स्म यत् तत्रभवान् सर्वैः सह समासीनोऽपि सदा स्वतन्त्रयेण संमण्डितो विराजते स्म। शिरस्त्राणेन उपनेत्रेण च आवृतम् अभवत् अङ्गम्। शिखा-श्मश्रुयुतो ग्राम्यश्च परिच्छदः छात्रान्तरेभ्यः स्वभावत एव स्वातन्त्र्यं तस्य साधयति स्म।

आधुनिके युगे एवंविधम् अतीव कृच्छ्रसाध्यं तपश्चरणं विरलदृष्टम् एव विभाति। सर्वस्य जनसमाजस्य समीपे दिव्यं तत् तपश्चरणं कमपि सुमहान्तम् आदर्शं तपश्चरणस्य समुपस्थापयति। श्रीमता सत्यानन्ददेवेन आशैशवं स्वीकृतम् इदं तपश्चरणं समुन्नतिकामिनां तरुणानां जनानां समीपे अश्रुतपूर्वां कांचित् उत्समर्यीं वार्तां विघोषयति। आधुनिके युगे जीवने प्रतिष्ठायाः प्राप्तये प्रवर्तमानायां सुतीव्रायां प्रतियोगितायां तत्रभवता प्रदर्शितः तपश्चरणस्य आदर्शः मानवं जगज्जयिनं कर्तुं समर्थः। योयमेव विषयं कामयते स एव विषयः तस्य करायत्तो भवेत् तत्रभवता प्रदर्शितस्य तपसः सीमितरूपेणापि समाचरणेन।

श्रीसत्यानन्ददेवो दिव्यजीवनव्यापिन्या साधनया आत्मनो मोक्षाय जगतः कल्याणाय च अनवद्यं परिकल्पना समूहं विरचितवान्। सूक्ष्मे आध्यात्मिके स्तरे परिकल्पनानां तासां वास्तवायनस्य प्रक्रिया अद्यत्वेऽपि सततं प्रवर्तमाना एव विद्यते। वैकुण्ठस्य प्राङ्गणरूपेण देवैः ऋषिभिश्च प्रशंसितस्य भारतस्य उपरि भगवतः दिव्यदृष्टिः सत्यानन्ददेवस्य साधनाम् इमां समुपचितां साधितवती। सा च साधना अचिरमेव आगामिनि समये जगत्सभायां श्रेष्ठत्वस्य आसने अवश्यं प्रतिष्ठापयिष्यति भारतवर्षम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अशेषकल्याणकरीं सत्यानन्दवार्ताम् अखिले भारतवर्षे वहन्ती "सत्यानन्दम्" मासिकपत्रिकेयम् देवभाषया ग्रथिता द्वात्रिंशद् वर्षान् यावद् निरवच्छिन्नं प्रकाशं प्राप्नोति। अद्य त्रयस्त्रिंशे वर्षे पदार्पणस्य असुलभं सौभाग्यं तस्य भारतवर्षस्य आगामिकं सौभाग्यम् अपि असाधारणं संसूचयति।

भगवतः सत्यानन्ददेवस्य दिव्येन निर्देशेन निर्मितं सत्यानन्ददेवायतनम् जगत्कल्याणकराणां कर्मयज्ञानाम् अजस्रम् अतन्द्रितम् अनारतं सम्पादनाय सन्नद्धम् एव सन्तिष्ठति सन्ततम्। आश्रमस्य अधिष्ठात्री साक्षात् श्रीदुर्गारूपिणी जननी अर्चनापुरी माता अतिमहत्या शुभेच्छया तस्याः असम्भवम् अपि सुसम्भवं कर्तुं शक्नोति। स्वर्लोकस्य सम्पदम् अपि दुर्लभां सा दयितानां जगज्जनानाम् अशेषाय कल्याणाय उपायनरूपेण आनीतवती। "सत्यानन्द-मङ्गलकाव्यम्" तथा दिव्यजीवननिर्माणस्य उपायनभूतेन उपादानेन सम्भृतं तद्रचितं काव्यामृतं संगीतसुधा धारा च नियतं भारतवसुन्धरां प्लावयति अमृतसेकेन सन्ततम्।

स्वामिना विवेकानन्देन ध्यानमयेन नेत्रेण भारतस्य यद् भास्वरं रूपं निरीक्षितं तस्यैव रूपायनाय तपोमूर्तिना भगवता सत्यानन्ददेवेन निवेदितम् अखण्डरूपेण महाजीवनम् स्वकीयम्। सत्यानन्दमहापीठस्य परिकल्पनायां गुरुपरम्परया प्राप्तस्य ध्यानमयस्य नवभारतस्य वास्तवे जगति रूपदानाय सन्नद्धो विद्यते निरन्तरं मातृपूजन-परायणः असाधारणः तपस्वी तेजस्वी तथा मनीषी स्वामी मृगाननन्दमहाराजः। असाधारणं तत्रभवतः सांघठनिकं सामर्थ्यं न केवलम् समूर्जिते आध्यात्मिके राज्ये एव सर्वोत्कर्षेण विराजते। अपि तु आगामिके नवभारतस्य निर्माणे विधात्रा विनियुक्ता सा मनीषा भारतस्य समुन्नतिं गगन-स्पर्शिनीं विधास्यति। निःस्वार्थं तपश्चरणपरायणाः सन्न्यासिन एव जगन्मङ्गलस्य साधनाय अलम्।

कलिकल्मषेण कलुषिताया: भ्रष्टाचारेण पापाचरणेन च पङ्किलाया धरण्याः समुद्धरणाय शुद्धबोधाः तथा सिद्धिमन्तः सन्न्यासिन एव सत्यानन्ददेवस्य दिव्येन आशीर्वादेन सामर्थ्य-सम्पन्नाः संशोभन्ते। तेषां च मध्यमणिरूपेण विराजमानो महाराजः स्वामी मृगानन्दः स्वीयं विजयं भारतस्य सुमहते विजयाय विनिवेदयति नियतम्।

समुज्ज्वलं यदैवाहं तपोभास्वरविग्रहम्।
मृगानन्दमहाराजं पश्यामि पुरतः स्थितम्।।
आनन्दस्यातिशय्यने विपुलावेगविह्वलः।
नवरूपधरं तं हि वन्दे वेदतनुं ऋषिम्।।

सत्यानन्दपत्रिकायाः शुभे त्रयस्त्रिंशे वर्षे पदार्पणस्य अस्मिन् नन्दनीये वन्दनीये च काले वयं पत्रिकाया ग्राहकान् अनुग्राहकान् संस्कृत-संस्कृतिप्रेमिकान् अशेषान् भारतवासिनश्च हृदय-समुत्थेन सत्यानन्दामृतस्य अभिषेकेण अभिषिञ्चामः। युक्तकरं सर्वेभ्यो भारतवासिभ्यः अमृतस्य पुत्रेभ्यः प्रार्थयामः सत्यानन्दभावनया संहताः सर्वे सन्तानाः एकचित्तीभूय आगामिनीं भारतवर्षस्य समुन्नतिं गगनस्पर्शिनीं विदधतु इति।

निवेदकः- ह्रः श्रीसमर्थनाथभट्टाचार्यः।

CC-0. Nepal Sanskrit Academy, Kathmandu. Digitized by eGangotri

सर्वदेवमयः श्रीसत्यानन्दः // स्वामी मृगानन्दः

श्रीसत्यानन्दपरिचितिः (०६)

श्रीरामकृष्ण-आश्रमः तपस्यायाः क्षेत्रमभवत्। आश्रमस्य सन्तानाः शरीरधारणस्य अनिवार्य-प्रयोजनाय निरामिषं सात्त्विकमाहारं स्वीकुर्वन्ति स्म, तदपि आहारं पुनः मरीचं, लवणं च विहाय निर्मितं भवति स्म। तदेव आहारं त्यागमुखिनः सन्तानाः स्वीकुर्वन्ति स्म। तपस्यायां कञ्चन अनास्वादितम् आनन्दं समनुभवन्ति स्म। आश्रमस्य कर्मचक्रं यदा क्रमशः वर्धितं जातं तदा श्रीठाकुरः सन्तानान् निर्दिशति स्म–"यूयं समग्रदिवसे षट्-घटिका जप-ध्यान-पूजा-प्रभृतिषु साक्षात् ईश्वर-विषयक-कर्मसु स्थापयताम्।" न केवलमेतदेव, ठाकुरस्य एका विशेषोपदेशवाणी आसीत्–"सर्वेषां कर्मणां मध्यतः मनः एकवारस्य कृते निवृत्तं कुरुताम्। पश्यताम् मनः इष्टाभिमुखम् अस्ति वा न वा।" तत्रभवान् वदति स्म, "साधना तदैव महासाधना स्याद् यदि सर्वासु अवस्थासु तां स्थापयितुं शक्यते।"

आश्रमस्य कर्मचक्रस्य सूचनमभवत् क्षुद्रबालकानां कृते एकस्य विद्यालयस्य माध्यमेन। श्रीठाकुरः बालकानां कृते स्वकीयं पाठ्यक्रमम् एकं निर्मितवान्। तस्य पाठ्यक्रमस्य आसीत् किञ्जिद् वैशिष्ट्यम्। ठाकुरः विदेशिशासनस्य प्रभावेन पराधीनमनोभावयुक्तं शोणितक्षयमयम् इतिहासं वर्जितवान्। तस्मिन् स्थले आदर्शपुरुषाणां जीवनेतिहासः पाठ्यक्रमरूपेण निर्दिष्टः अभवत्। भूगोलस्य गतानुगतिकपाठस्य स्थले सुन्दराणां सुन्दराणां भ्रमणवृत्तान्तानां तथ्यानि आश्रित्य निर्मितं भौगोलिकज्ञानं पाठ्यक्रमरूपेण स्थापितवान्। शोभनानि साहित्यानि सर्वाण्येव पाठ्यक्रममध्ये आसन्। किन्तु सच्चारित्राणां निर्माणमेव आसीत् मूलं लक्ष्यम्। भाषायाः दिव्यताविषये आसीत् श्रीठाकुरस्य तीक्ष्णा दृष्टिः। श्रीठाकुरः लेखने तथा भाषणे कस्यापि अदिव्यस्य शब्दस्य प्रयोगं कदापि न करोति स्म तथा सन्तानेभ्यः अपि इमां शिक्षां दत्तवान्। वदति स्म, भाषा एव मनसः प्रकाशः। भाषायाः दैन्यं भवति मनसः दैन्यम्।

ड.- श्रीविप्लव-चक्रवर्तिनानूदितम्।

महाकवेः अश्वघोषस्य बुद्धचरितम्

ड.-विप्लवचक्रवर्ती

महाकविना अश्वघोषेण महाकाव्यद्वयं विरचितम् –सौन्दरनन्दम् तथा बुद्धचरितम्। अध्यापकस्य ए.वि.-कीथ-महोदयस्य मते सौन्दरनन्दमेव अश्वघोषस्य प्रथमा कृतिः। अत्र बुद्धदेवस्य बैमात्रेयभ्रातुः नन्दस्य बौद्धधर्मस्वीकरणस्य वृत्तमस्ति। अश्वघोषस्य सर्वोत्तमा कृतिर्हि बुद्धचरितम्। भगवतः बुद्धदेवस्य चरितमाश्रित्य रचितमिदं महाकाव्यम्।

ललितविस्तरे तथा महावस्त्ववदाने वर्णिता बुद्धस्य जीवनकथा अश्वघोषस्य मानसमाश्रित्य काव्यशरीरं प्राप्य संस्कृतमहाकाव्यनभसि चिराय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विराजतेतराम्। अतः बुद्धचरिते केवलं तपःपूतचरितस्य बुद्धदेवस्य जीवनं नात्र प्राप्यते, किन्तु रससिक्तकल्पना प्राप्यते रसशोभिते बुद्धचरिते। बौद्धदर्शनस्य यानि दार्शनिकतत्त्वानि तानि प्रायः काव्यस्यास्य पङ्क्तिषु शोभमानानि सन्ति। अतः बुद्धचरितमेकं दार्शनिकमहाकाव्यमिति वक्तुं शक्यते।

राजमार्गे मृत्योः भीषणं चित्रं तथा क्लेशस्य दुःसहतामवलोक्य बुद्धदेवस्य वैराग्यं समुत्पन्नमिति वयं जानीमः एव। किन्तु मृत्युः चिरन्तनं सत्यमिति अनुभूय एव अश्वघोषः मृत्योः वर्णनसमये भीषणतां नाश्रितवान्। सिद्धार्थस्य सन्न्यासग्रहणादनन्तरमेव मातुः मायादेव्याः मरणम् अभवत्। अत्र कविः वर्णयति कुमारस्य सन्न्यासग्रहणेन समुत्पन्नः यः प्रभावः तस्य दर्शनेन एव आनन्दिता जननी प्राणान् तत्याज। तदुक्तं बुद्धचरितस्य–

देवी तु माया विबुधर्षिकल्पं दृष्ट्वा विशालं
तनयप्रभावम्।
जातं प्रहर्षं न शशाक सोढुं ततो निवासाय
दिवं जगाम।
(बु.च. ०२/१८/)इति।

अश्वघोषः तदपि शाश्वतं सत्यमनुभूतवान् यत् परिणामं हि निश्चितम्, अर्थात् मृत्युर्हि अवश्यम्भावी तथापि मानवा जागतिकविषयेषु प्रमत्ताः सन्ति। कविः परिहासच्छलेन अवदत् मानवानां मनः हि कठिनम्। अतः मानवः मृत्युमार्गे स्थितोऽपिः स्वस्थं तिष्ठति। तदुक्तं तृतीये सर्गे–

इयं च निष्ठा नियता प्रजानां
प्रमाद्यति त्यक्तभयश्च लोकः।
मनांसि शंके कठिनानि नृणां
स्वस्थस्तथा ह्यध्वनि वर्तमानाः॥
(बु.च.०३/५१) इति।

अश्वघोषः आलङ्कारिकसम्मतस्य महाकाव्यस्य रचनायां प्रवृत्तोऽभवत्। अतः प्राकृतिकशोभायाः वर्णनम् आध्यात्मिकतत्त्वस्य वर्णनं तथा शृङ्गाररसस्य समावेशः प्राण्यते बुद्धचरिते। तृतीये सर्गे नारीणामनुभाववर्णने यत् पटुत्वं तेन प्रदर्शितं तद्धि प्रशंसनीयम्। शरदः मेघैः तुलिताः ताः कन्यकाः। तदुक्तं बुद्धचरिते–

ततः शरत्तोयदपाण्डुरेषु भूमौ विमानेष्वपि
रञ्जितेषु।
हर्म्येषु सर्वर्तुसुखाश्रयेषु स्त्रीणामुदारैर्विजहारे
तुर्यैः॥ इति।

महाकवेः अश्वघोषस्य 'बुद्धचरितम्' हि आलङ्कारिकसम्मतं प्रथमं महाकाव्यमिति वक्तुं शक्यते। भावगम्भीरभाषया कविः वास्तवं सत्यं प्रकाशितवान्। जरायाः, व्याधेः, मृत्योः निर्दयरूपं समुद्घाट्य विषयसुखे प्रमत्तान् जनान् सन्न्यासधर्मे समुद्बुद्धान् कृतवान् कविः। किन्तु महाकाव्यरचनायां प्रवृत्तः कविः जीवनं सम्पूर्णतः अस्वीकर्तुं समर्थो नाभवत्। विशेषतः नारीणां सौन्दर्यं सम्पूर्णतः उपेक्षितुं न समर्थः अभवत् कविः अश्वघोषः।

अश्वघोषः वैदभीरीतेः कविः। तत्रभवतां महाकाव्ये यमकस्य, अनुप्रासस्य, उपमायाः, उत्प्रेक्षायाः काव्यलिङ्गस्य विशेषप्रदर्शनं वर्तते। रामायणे, महाभारते, कामशास्त्रे, षडङ्गवेदे, वेदान्ते, न्याये, योगे, सांख्ये–प्रभृतिषु शास्त्रेषु कवेः अवाधविचरणमासीत् नात्र संशयलेशः। अतः सर्वं विचार्य वक्तुं शक्यते 'बुद्धचरितम्' एकं सार्थकं महाकाव्यमिति शम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्वेतकेतोः ब्रह्मज्ञानम् //पथिकः

छान्दोग्योपनिषदि षष्ठाध्याये प्रथमखण्डे आत्मतत्त्वस्य बोधनाय श्वेतकेतोः उपाख्यानम् आम्नातं विद्यते। श्वेतकेतुः नाम अरुणस्य पौत्र आसीत्। पिता आरुणिः श्वेतकेतुं विद्याया उपयुक्तं पात्रं मत्वा, उपनयनस्य च तस्य कालः अतीतो भवति इति दृष्ट्वा तम् अवदत् हे श्वेतकेतो! गुरोः अन्तिकं गत्वा ब्रह्मचर्यम् आचर। एतदपि नोचितं यत् अस्माकं वंशे कोऽपि वेदम् अनधीत्य ब्रह्मबन्धुरिव तिष्ठेत्।

ततः श्वेतकेतुः पितुः आदेशानुसारं गुरुकुलं गतवान्। द्वादशवर्षे वयसि गुरुकुलं गतः स द्वादश वर्षान् यावद् वेदम् अखिलम् अधीतवान्। चतुर्विंशे वर्षे वयसि स गृहं प्रत्यावृत्तः पाण्डित्याभिमानेन गर्वितः औद्धत्येन स्फीतः आत्मानम् अतीव उन्नतम् अमन्यत।

पिता तं सन्मार्गे समानेतुं सस्नेहं प्रश्नम् इमम् अपृच्छत्—अपि त्वं परब्रह्मविषयकम् आदेशं गुरुसमीपे पृष्टवान्? येन आदेशेन श्रुतेन अन्यत् अश्रुतम् अपि श्रुतं भवति। अमतं मतम्, अविज्ञातं विज्ञातं भवति?

अद्भुताम् इमां कथां श्रुत्वा श्वेतकेतोः अहंकारो विगलितो जातः। यतो गुरुकुले स वेदम् अखिलं केवलं कण्ठस्थीकृतवान्। किन्तु, अधीतानां वेदानाम् अन्तर्निहितं रहस्यं नैव अवगतवान्। पितुः चरणयोः प्रणिपत्य लज्जितः सः अवदत् यस्य श्रवणेन अश्रुतं श्रुतम्, अमतं मतम्, अविज्ञातं विज्ञातं भवति तादृशं विशिष्टं ज्ञानम् अहं नैव ज्ञातवान्। कृपया भवान् तत् मे प्रबोधयतु।

पिता ततः तन्मना भूत्वा अवदत्—येन अश्रुतं श्रुतं भवति, अमतं मतं भवति अविज्ञातं विज्ञातं भवति तदेव ब्रह्म। आरम्भनशब्दादिभ्यः कार्यकारणयोः अनन्यत्वम् अवगम्यते। कार्यम् आकाशादिकं बहुप्रपञ्चं जगत्, कारणं परं ब्रह्म। आरम्भनशब्दादिभ्यः तयोः अनन्यत्वम् अवगम्यते। आरम्भनश्रुतिस्तावत् एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय दृष्टान्तरूपेण वदति—यथा सौम्यैकेन मृतपिण्डेन सर्वं मृन्मयं विज्ञातं स्याद् वाचारम्भनं विकारो नामधेयं मृत्तिकेत्येव सत्यम् (छा ६/२/२) एकेन मृत्पिण्डेन परमार्थतो मृदात्मना विज्ञातेन सर्वं मृन्मयं घटशरावोदञ्चनादिकं मृदात्मकत्वेन विज्ञातं स्यात्। यतो विकारः खलु वाचा एव केवलम् आरभ्यते। न तु यथार्थतो विकारो नाम कश्चिद् अस्ति। नामरूपैः विभिन्नात्मकरूपेण मन्यमानानि हार-केयूर-कुण्डल-नूपुराद्याभरणानि सुवर्णात्मकानि। तेषु सुवर्णस्य एव सत्यत्वम्, न तु अनन्तानां नामरूपाणाम्। नानात्वज्ञानं मिथ्या, एकत्वज्ञानमेव पारमार्थिकम्। तथा च श्रुतिः नेह नानास्ति किञ्चन (बृ ४/४/१९)

सत्स्वरूपा सा देवता तेजोऽवन्न रूपस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूतात्मकदेवतात्रयस्य अभ्यन्तरं प्रविश्य नामरूपात्मकं जगद् व्याकृतवती। अग्नेः आदित्यस्य चन्द्रमसः, विद्युतः, त्रिवृत्कृतस्य बहूनि रूपाणि, न सत्यानि। किन्तु त्रीणि रूपाणि एव सत्यानि।

तदनन्दरं पिता पुत्राय जिज्ञासवे अवदत् बाह्यं सर्वं वस्तु तेजो जलम् अन्नरूपं चेति त्रिधा विज्ञातव्यम्। हे सौम्य! अथ इदानीं यथा नु खलु यथोक्ताः तिस्रो देवताः पुरुषं शिरः-पाण्यादिलक्षणं कार्यकारणसंघातं प्राप्य पुरुषेण उपयुज्यमानाः त्रिधा विभक्ता भवन्ति तन्मे व्याख्यानाद् विजानीहि।

भुक्तस्य अन्नस्य स्थविष्ठो भागः पुरीषं भवति, मध्यमो मांसम् अणिष्ठं च मनो भवति। भुक्तस्य तेजसः स्थाविष्ठो भाग अस्थि भवति मध्यमो मज्जा अणिष्ठा च वाग् भवति। अन्नमयं मन आपोमयः प्राणः तेजोमयी च वाग् भवति।

तदनन्तरं पिता अवदत् हे सौम्य। अस्मिन् देहे विशीर्णे जीवो देहान्तरम् अधिष्ठितो भवति। येन क्रमेण स पूर्वदेहात् प्रच्यूतो गच्छति तत् शृणु—पुरुषस्य म्रियमानस्य वाक् मनसि उपसंहृतं भवति। मनः प्राणे लीनं भवति। ऊर्द्ध्वोच्छ्वासी प्राणः तदा तेजसि विलीनो भवति। तेजश्च परस्यां देवतायां प्रशाम्यति। तदेवं क्रमेण उपसंहृतः परदेवतां प्राप्तो भवति जीवः। सत्यानुसन्धान-पूर्वकम् अपसंहृतः चेत् आनन्दमयम् अभयं सदेव सम्पद्यते। अनात्मज्ञस्तु जीवः मृत्वा सुषुप्तावस्थाया इव उत्थाय पुनः देहान्तरं प्रविशति।

एषा सत्संज्ञिका अणुता जगतो मूलम् 'ऐतदात्म्यम्' इति तदुक्तम्। सदाख्यं कारणं सत्यम् एव परमार्थसत्। अतएव—"तत्त्वमसि श्वेतकेतो" इति उक्तम्। हे श्वेतकेतो! तत् सत्स्वरूप एव त्वमसि।

एवं प्रत्यायितोऽपि पुत्र आह—भगवन् मां कृपया बोधयतु केन कारणेन प्रत्यहं सुषुप्तौ सता सम्पन्ना अपि जीवाः न विदन्ति सता सम्पन्ना वयम् इति।

तदनन्दरं पिता नवभिः लौकिकैः अनुपमैः दृष्टान्तैः अलौकिकं तत् सत्स्वरूपं परब्रह्म एव परमार्थतया जगतः स्वरूपम् इति संबोधयति स्म, परमस्नेहभाजनाय स्वकीयाय पुत्राय श्वेतकेतवे। निम्नोक्तैः दृष्टान्तैः तैः दार्ष्टान्तिकम् (उपमेयम्) ब्रह्म बोधयति पिता। मृद्विकाराणां दृष्टान्तः, मधुमक्षिकाणां दृष्टान्तः, नदीनां दृष्टान्तः, वृक्षाणां दृष्टान्तः, वटवीजस्य दृष्टान्तः, लवणस्य दृष्टान्तः, मुमूर्षो पुरुषस्य दृष्टान्तः, मिथ्याभिनिवेशिनः चौरस्य तप्तपरशुग्रहण-दृष्टान्तः।

परमात्मस्वरूपोऽपि श्वेतकेतुः पितुः उपदेश-श्रवणात् प्राक् देहात् सर्वथा पृथग्भूतं सत्स्वरूपम् सर्वव्यापकम् आत्मानं नैव जानाति स्म। अथ पिता तं दृष्टान्तेन युक्तिबलेन च "त्वम् एव असौ ब्रह्म" (तत्त्वमसि) इति उत्तमरूपेण बोधविषयीकरोति स्म। पितुः उपदेशं प्राप्तः स प्रकृष्टतया प्रबुद्धोऽभवत् यत् "अहम् सद् ब्रह्मास्मि, ब्रह्मास्मि" इति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

एकदा सत्यमेव तज्जातम्।	एकदिन सचमुच ऐषा ही हुआ।
एकदा सत्यमेव तज्जातम्।	एकदिन सत्यই তাই হল।
दूरतः ज्ञातुं पारयामि स्म यत् प्रसादपात्रं रिक्तं जातम्।	दूर से ही समझ गया था कि प्रसादपात्र खाली हो चुका है।
दूरतः ज्ञातुं पारयामि स्म यत् प्रसादपात्रं रिक्तं ज्यातम् ।	दूर थेके बुझते पारछिलाम ये प्रसादेर कौटो खालि हয়ে গেল।
श्रीठाकुरः मां न आह्वयति स्म एव।	श्रीठाकुर मुझे नही बुला रहे हैं।
श्रीठाकुरः मां न आह्वयति स्म एव।	শ্রীঠাকুর আমাকে ডাকছেন না।
अन्ततः मां प्रति तत्रभवतः दृष्टिः अपतत्।	अन्तमें मुझपर उनकी दृष्टि पड़ी।
অন্ততঃ মাং প্রতি তত্রভবতঃ দৃষ্টিঃ অপতৎ।	শেষে আমার দিকে তাঁর দৃষ্টি পড়ল।
तत्रभवान् अवदत् अयि भो! हीरेन, तं न प्राप्तवान्।	उन्हेने कहा—ओ हो हीरन तुझे तो नही मिला।
তত্রভবান্ অবদৎ অয়ি ভো! হীরেন, তং ন প্রাপ্তবান্।	তিনি বললেন ও হে, হীরেন তুমি তো পাওনি।
आगच्छ, आगच्छ, परन्तु तुभ्यं किं यच्छामि, पुनः किमपि नास्ति।	आओ आओ पर क्या दूँ तुम्हे, और तो कुछ भी नही है।
আগচ্ছ, আগচ্ছ, পরন্তু তুভ্যং কিং যচ্ছামি, পুনঃ কিমপি নাস্তি।	এস, এস, কিন্তু কি দিই তোমায়, আর যে কিছুই নেই।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

REGISTERED Postal Regn. No. KOL RMS/17/2019-21 Regn. RNI No. 44201/88.

शिक्षाभ्यासः	Learn Sanskrit
सत्सव्रतः अवदत् "हे मातः भवती कृपां कृत्वा दर्शनं दत्तवती।"	Satyabrata said—Maa, you have so kindly given darshan to me.
हे मातः पुत्रस्य मनःकष्टम् अनुभूतवती भवती।	Maa you have felt the pangs of your child!
वारं वारं समागतस्य सत्यव्रतस्य विवाह-प्रस्तावस्य विषयमाश्रित्य संसारे एकम् अशान्तिपूर्णं परिवेशं प्रचलति स्म।	An atmosphere of disquiet used to prevail in the house due to frequent marriage proposals for Satyabrata.
एकदा अशान्तिः सत्यव्रतस्य सहनस्य पारम् अगच्छत्।	One day it was too much for him to tolerate any more.
सत्यव्रतः सर्वेभ्यः अशान्तिमय- परिस्थितिभ्यः मुक्तिम् इच्छति स्म।	Satyabrata decided once for all to get rid of this state of irritating circumstance.
तस्य परिवारः स्वतन्त्रतया जीवन-परिचालनाय तस्मै सुयोगं दातुं न ऐच्छत्।	The members of his family were not ready to give him independence in leading his life.

Owner's Name : Trustees of Hari Satyananda Charitable Trust
Printer's Name : Swami Mrigananda
Publisher's Name : Swami Mrigananda

Published From : Sree Satyananda Devayatan, 1, Ibrahimpur Road, Jadavpur, Kolkata-700 032
Name of the Printing Press : City Graphics, 18/A, Dr. Dhiren Sen Sarani, Kolkata-700 006
Editor Name : Swami Mrigananda

CC-0. Nepal Sanskrit Academy, Kathmandu Collection